# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-३ (SEM-5)** | **प्रश्नपत्र-१** | **गुणा: - ७०** |
| **विषय:- अनिवार्यसंस्कृतम्** | **CF-355 Old Course** | **समय: - ११ त: ०२** |
| **दिनाङ्क: - २४/११/२०१६** | **सन्दर्भग्रन्थ: - उत्तररामचरितम् ( १-३ अङ्का: )** | |

---

**॥ प्रथमान्विति: ॥**

**प्र-१ द्वौ गद्यखण्डौ ससन्दर्भं व्याख्यायताम् ।** ०८

१. सूत्रधार: - अद्य खलु भगवत: कालप्रियानाथस्य यात्रायामार्यमिश्रान् विज्ञापयामि - एवमत्र भवन्तो विदां कुर्वन्तु ।

२. राम - एवमेतत् । एते हि हृदयमर्माच्छेद: संसारभावा: । येभ्यो बीभत्समाना: संत्यज्य सर्वान् अरण्ये विश्राम्यन्ति मनीषिण: ।

३. अष्टवाक्र:- इदं च भगवत्याऽरुन्धत्या देवीभि: शान्त्या च भूयो भूय: संदिष्टम् - य: कश्चिद् गर्भदोहदो भवत्यस्या: सोऽवश्यमचिरान्मानयितव्य इति ।

**प्र-२ कस्याचिदेकस्य समीक्षात्ममुत्तरं लिखत ।** ०८

१. ग्रन्थोक्तदिशानुसारं अष्टावक्रस्य चरितं वर्णयतु ।

२. प्रथमाङ्कस्य सारांशं लिखत ।

३. भवभूते: साहित्यिकपरिचयो देय: ।

**प्र-३ टिप्पणीद्वयं लिखत ।** ०४

१. सीताया: मनोदशावर्णनम् ।

२. चित्रदर्शनप्रसङ्ग : ।

३. दाम्पत्यजीवनम् ।

**प्र-४ पञ्चानां लघूत्तराणि दीयताम् ।** ०५

१. उत्तररामचरितस्य क: कर्ता?

२. ग्रन्थे कति अङ्का: सन्ति?

३. शान्ताया: पिता क:?

४. श्रृंगी ऋषे: आश्रमात् क: आगत:?

५. सीताया: जजनी का?

६. प्रथमाङ्कस्य नाम किम्?

**॥ द्वितीयान्विति: ॥**

**प्र-५ द्वयो: ससन्दर्भं व्याख्या कार्या ।** ०८

१. यथेच्छाभोग्यं वो वनमिदमयं मे सुदिवस: सतां सद्भि: सङ्ग: कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं यदपि तपसां योग्यमशनं फलं वा मूलं वा तदपि न पराधीनमिह व: ॥

२. स्निग्धश्यामा: क्वचिदपरतो भीषणाभोगरुक्षा: स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम् ।
एते तीर्थाश्रमगिरिसरिद्गर्तकान्तारमिश्रा: संदृश्यन्ते परिचितभुवो दण्डकारण्यभागा: ॥

३. यस्यां ते दिवसास्तया सह मया नीता यथा स्वगृहे तत्सम्बन्धकथाभिरेव सततं दीर्घाभिरास्थीयत।
एकः सम्प्रति नाशितप्रियतमस्तामेव रामः कथं पापः पञ्चवटी विलोकयतु वा गच्छत्वसम्भाव्य वा॥

**प्र-६ शम्बूकप्रसङ्गं सविस्तरं वर्ण्यताम्।** **०८**

**अथवा**

**द्वितीयाङ्कस्य सारांशः यथाग्रन्थं लेख्यः।**

**प्र-७ द्वयोः टिप्पणी कार्या।** **०४**

१. अगस्त्यमुनेः उपदेशः।

२. आत्रेयीवर्णनम्।

३. पञ्चवटेः स्थितिवर्णनम्।

**॥ तृतीयान्वितिः ॥**

**प्र-८ द्वयोः ससन्दर्भं व्याख्या कार्या।** **०८**

१. वीचीवातैः सीकरक्षोदशीतैराकषद्भिः पद्मकिञ्जल्कः मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेरितैस्तर्पय गन्धान्।

२. त्वं जीवितं त्वमसि मे हृदयं द्वितीयम् त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धाम् तामेव शान्तमथवा किमतः परेण?

३. एकोरसः करुण एव निमित्तभेदात् भिन्नः पृथक्पृथगिव श्रयते विवर्तान्।
आवर्तबुद्बुद्तरङ्गमयान्विकारान् अम्भो यथा सलिलमेव हि तत्समस्तम्॥

**प्र-९ उत्तररामचरितस्य तृतीयाङ्कस्य वैशिष्ट्यं निरूप्यताम्।** **०८**

**अथवा**

**तृतीयाङ्कस्य सारांशं सविस्तरं लिखत।**

**प्र-१० टिप्पणीद्वयं लिखत।** **०४**

१. उत्तररामचरिते करुणरसः।

२. लोपामुद्रासन्देशः।

३. सीतावियोगवर्णनम्।

**प्र-११ पञ्चप्रश्नाः एकेन वाक्येन समाधेयाः।** **०५**

१. को रसः प्रधानभूतः अङ्केऽस्मिन्?

२. तृतीयाङ्कस्य प्रारम्भे कयोः संवादः वर्तते?

३. तृतीयाङ्कस्य नाम किम्?

४. का मुरला का च तमसा?

५. सीतां वाल्मिकेः आश्रमं का प्रेशिता?

६. का अन्तर्हिता सर्वोपदृष्टा च?

७. कस्याः स्पर्शात् रामः चेतनां याति?